3

# को ऽरुक्



एकः पक्षी अस्ति ।

सः आकाशे अत्र तत्र गच्छति ।

सः पुनः पुनः वदति "कोऽरुक्" ?

(कः नीरोगः भवति ?)



पक्षी द्वारं द्वारम् अटति ।

एकम् एव प्रश्नं पृच्छति ।

जनाः उपहासं कुर्वन्ति ।

कोऽपि उत्तरं न ददाति ।

पक्षी निराशः भवति ।



सः वनं गच्छति वृक्षे उपविशति च ।

वृक्षस्य अधः वैद्यर्षिः वाग्भट्टः अस्ति ।

पक्षी पुनः वदति,"कोऽरुक् ? कोऽरुक् ?

इति"। वाग्भट्टः श्रुणोति ।



सः वदति,

"हितभुक्, मितभुक् ऋतभुक्" इति ।

अर्थः अस्ति, यः हितकारि भोजनं करोति,

यः मितं भोजनं करोति,



यः ऋतु-अनुसारं भोजनं करोति

सः एव नीरोगः भवति इति ।

सन्तुष्टः पक्षी ऋषिसमीपम् आगच्छति ।

सः ऋषिं नमति । अनन्तरं स्वस्थानं गच्छति ।

## Glossary

**कोऽरुक्** - कः अरुकः Who is healthy ? **अटति** moves **उपहासम्** Fun **वैद्यर्षिः** doctor (vaidya-rishi) **हितभुक्** one that takes balanced meals **मितभुक्** one who takes meals in proper quantity **ऋतभुक्** One who takes meals according to season **स्वस्थानम्** at one's own place

**विशेष**

**कोऽरुक्-कः अरुक्, कोऽपि - कः अपि**

## Exercise

1. **Pronounce the following words orally :**

वैद्यर्षिः, श्रृणोति, हितभुक्, ऋतभुक्, अनन्तरम्, स्वस्थानम्, कोऽरुक् ।

2. **Answer the following questions based on the content of the lesson. (In Sanskrit.)**

(1) पक्षी किं वदति ?

(2) पक्षी वने कुत्र उपविशति ?

(3) वृक्षस्य अधः कः अस्ति ?

(4) ऋषिः किं वदति ?

(5) सन्तुष्टः पक्षी कुत्र आगच्छति ?

3. **Find out the actions verbs from the unit. Them write them in blanks. Follow the illustration :**

**Example :** गच्छति ______________ ______________

______________ ______________ ______________

______________ ______________ ______________

4. **Follow the illustration and frame sentences :**

**उदाहरण :** भिक्षुकः ________ गच्छति । (गृहम्)

भिक्षुकः गृहं गृहं गच्छति।

(1) शृगालः ________ भ्रमति । (वनम्)

(2) नृपः ________ गच्छति । (नगरम्)

(3) साधुः ________ पश्यति । (तीर्थम्)

(4) पक्षी ________ अटति । (द्वारम्)

5. **Follow the illustration and frame sentences :**

**उदाहरण :** पक्षी ________ गच्छति ________ उपविशति च । (वनम्, वृक्षः)

पक्षी वनं गच्छति वृक्षे उपविशति च ।

(१) छात्रः ________ गच्छति ________ उपविशति च । (शाला, आसनम्)

(२) अधिकारी ________ गच्छति ________ उपविशति च । (कार्यालयः, आसन्दः)

(३) भक्तः ________ गच्छति ________ उपविशति च । (मन्दिरम्, पूजास्थानम्)

(४) सिंहः ________ गच्छति ________ उपविशति च । (वनम्, वृक्षतलम्)

**Activity**

- Enact and present the events of the picture-story.
- Tell a story based on the pictures of the picture story.
- Draw a picture of a bird, a fox or Rishi (sage).